रात् पितरं हन्ति मातरं तु त्रिवर्षतः। द्युम्नं वर्षद्वयेनैव श्वशुरं नववर्षतः। जातं बालं वत्सरेण वर्षैः पञ्चभिरग्रजम्। मातुलं चाष्टभिर्वर्षैरनुक्तान् हन्ति सप्तभिः। तस्माच्छान्तिं प्रकुर्वीत प्रयत्नाद्विधिपूर्वकमिति” द्युम्नं धनं तस्मादत्रश्य चरणचतुष्टयेऽपि शान्तिर्विधेयेति। अहिभे विलोममिति। अहिभे अश्लेषायामुक्तं फलं विलोमं विपरीतं ज्ञेयं तद्यथा मूलस्य प्रथमे पादे पितृनाश इति फलमुक्तं तत्फलमश्लेषाचतुर्थपादोत्पन्नस्य स्यात् मूलस्य द्वितीयपादे मातृनाश इत्युक्तं फलं तदश्लेषातृतीयचरणोत्पन्नस्य स्यात् अर्थनाशस्तृतीयचरणे इत्युक्तं तदश्लेषाद्वितीयपादजातस्य स्यात् मूलस्य चतुर्थपादः शुभ इत्युक्तं तदश्लेषाप्रथमचरणोत्पन्नस्य स्यादित्यर्थः। तदाह कश्यपः “फलं तदेव सार्पर्क्षे प्रतीपं त्वन्त्यपादतः” इति। वशिष्ठोऽपि “मूलाद्यपादजनितः पितरं निहन्ति द्वैतीयजः स्वजननीं त्रिपदेऽर्थहन्त्रम्। तौरीयजः शुभकरः फलमेतदेव वैलोमतो भुजगधिष्ण्यभवस्य सर्वमिति”। द्वितीय एव द्वैतीयः प्रज्ञादेराकृतिगणत्वात् स्वार्थेऽण् एवं तौरीयवैलोमशब्दौ साध्यौ। अयमर्थः स्पष्टमुक्तो भास्करव्यवहारे “सार्पांशे प्रथमे राज्यं द्वितीये तु धनक्षयः। तृतीये जननीनाशश्चतुर्थे मरणं पितुरिति”। अंशश्चरणः अत्र लग्नादिदौष्ट्ये सति दुष्टं फलमविकलं भवतीत्याह बादरायणः “मूलसार्पोदजं दौष्ट्यं स्यात् सम्पूर्णन्तु लग्नपे। सक्रूरेऽब्जे च विबले शुभदृष्टिविवर्ज्जिते” इति। अतः यथा अश्लेषादौष्ट्येऽपि शान्तिकं विधेयं तथाश्लेषान्त्यमघादिस्थान्तरालप्रहरात्मका भुक्तमूलाख्यकालेयोऽभिर्विहितस्तत्रोत्पन्नस्यापि शान्तिकं विधेयम्। अत्र सम्मतिवाक्यं प्रागभिहितं तत्र मूलशान्तिरश्लेषाशान्तिश्च गण्डान्तेन्द्रभेति पद्यव्याख्यानानन्तरं लिखिष्यते”।“अथात्र प्रसङ्गान्मूलवृक्षविचारोऽभिधीयते जयार्णवे मूलस्तम्भस्त्वचा शाखा पत्रं पुष्पं फलं शिखा। मुनयोऽष्टौ दिशो रुद्राः सूर्य्याः पञ्चाङ्कयोऽग्नयः। मूले तु मूलनाशः स्यात् स्तम्भे वंशविनाशनम्। त्वचि१० मातुर्भवेत् क्लेशः शाखायां११ मातुलस्य च। पत्रे१२ राज्यं विजानीयात् पुष्पे५ मन्त्रिपदं स्मृतम्। फले ४च विपुला लक्ष्मीः शिखायां३ मल्पजीवितमिति” अस्य मूलाख्यस्य पुरुषस्याङ्गेषु घटीविन्यासस्तत्रैव। “मूलस्य घटिकान्यासो मूर्ध्नि पञ्च५ नृपो भवेत्। मुखे सप्त७ मृतिः पित्रोः स्कन्धे वेदा४ महाबलः। बाह्वोरष्टौ बली पाण्योस्तिस्रो३ हस्तान्वितो भवेत्। हृदि खेटाः९ भूपमन्त्री नाभौ द्वौ२ ब्रह्मविद्भवेत्। गुह्ये दश१० ऽतिकामी स्याज्जानुनोः षण्६ महामतिः। पादयोः षण्६ मतिस्तस्येत्युक्तवान् कमलासनः” इति। अथ मूलोद्भूतायाः कन्यायाः फलार्थं मूलाङ्गविभागस्तत्रैव। “चतस्रो४ नाडिकाः शीर्षे कुर्वन्ति पशुनाशनम्। मुखे षट्६ धनहानिश्च कण्ठे पञ्च धनागमः। कौटिल्यं हृदये पञ्च बाह्वोर्वित्तागमं च तत्। वेदाः४ पाण्योर्दयाधर्म्मौ वेदा ४ गुह्येऽतिकामिनी। ज्येष्ठमातुलनाशश्च जङ्घयोर्युग४ नाडिकाः। ज्येष्ठभ्रातृविनाशश्च चतस्रो जानुयुग्मके। पादयोर्दश१० नाड्यश्च तत्र वैधव्यमादिशेत्। इति मूलप्रसूतायाः फलमीरितमीदृशमिति” अस्यार्थः शीर्षे चतस्रो ४ घटिकाः मुखे षट्६ कण्ठे पञ्च५ हृदये पञ्च५ बाह्वोर्बाहुद्वये पञ्चपञ्चेति५ वीप्सा। पाण्योर्मणिबन्धादधो भागयोस्तिस्र इत्यत्रापि वीप्सा। गुह्ये चतस्रः ४ जङ्घयोर्जङ्घाद्वये द्वे द्वे २।२ एवञ्चतस्रः जानुद्वये द्वे द्वे एवं चतस्रः पादयोः पादद्वये पञ्चपञ्चेत्येवं दश१० एवं मिलित्वा षष्टि६०र्घटिका भवन्ति। अथाश्लेषाजातयोः पुत्त्रकन्ययोरङ्गविभागेन फलं तत्रैवोक्तम् मूर्ध्नि पञ्चसु५ पुत्त्राप्तिर्मुखे सप्त७ पितृक्षयः। नेत्रे द्वे२ जननीनाशो ग्रीवायां स्त्रीषु लम्पटः। स्कन्धे वेदा ४ गुरौ भक्तिर्हस्तेऽष्टौ ८च बली भवेत्। हृद्येकादशभि११श्चात्मघाती संजायते नरः। द्वाभ्यां नाभौ भ्रमः,षड्भिर्गुदे नन्दै९स्तपोधनः। पादे पञ्च५ धनं हन्ति सार्पादेतत्फलं क्रमादिति”। अथाश्लेषावृक्षोऽपि तत्रैवोक्तः फलं पुष्पं दलं शाखा त्वग्लता कन्द एव च। सार्पवल्ल्या दश१० चां५ ङ्कं९ स्वर७ विश्वा१३ र्कं१२ सागराः ४। नाडिकास्तद्भवे बाले फलं ज्ञेयं यथाक्रमम्। श्रीः श्रीराजभयं हानिर्मातृपित्रात्मसंक्षयः” इति। अयञ्च विभागो नक्षत्रस्य षष्टि६०घटिकात्मकत्वे ज्ञेयः न्यूनाधिकत्वे तु त्रैराशिकमूह्यम्”।

वशिष्ठेनान्येष्वपि कियत्सु नक्षत्रेषु जातस्यारिष्टमुक्तं “चित्राद्यर्द्धे पुष्यमध्ये द्विपादे पूर्वाषाढाधिष्ण्यपादे तृतीये। जातः पुत्त्रश्चोत्तराद्ये विधत्ते मातापित्रोर्भ्रातरं चात्मनाशम्। द्विमासस्योत्तरादोषः पुष्ये चैव त्रिमासकः। पूर्वाषाढाष्टमे मासि चित्रा षाण्मासिकं फलमिति” अत्रोत्तराशब्देनोत्तराषाढा गृह्यते पूर्वाषाढासाहचर्य्यात्। अत एष्वपि नक्षत्रेषु यथाशक्तिमूलव-